# shrI mahAtripurasundarI suprabhAtam

# श्रीमहात्रिपुरसुन्दरी सुप्रभातम्

## Document Information

Text title : mahaatripurasundarii suprabhaatam

File name : tripurasupra.itx

Category : suprabhAta, devii, dashamahAvidyA, devI

Location : doc_devii

Author : Traditional

Transliterated by : R. Harshananda harshanand_16 at rediffmail.com

Latest update : August 28, 2021

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 2, 2024

*sanskritdocuments.org*

# श्रीमहात्रिपुरसुन्दरी सुप्रभातम्

जय जय शङ्कर
ॐ श्री ललिता महात्रिपुरसुन्दरी पराभट्टारिका समेताय
श्री चन्द्रमौळीश्वर परब्रह्मणे नमः ॥

ॐ उत्तिष्ठोत्तिष्ठ देवेशी उत्तिष्ठ शिवसुन्दरी ।
उत्तिष्ठश्री महाराज्ञी त्रैलोक्यऽं मङ्गलऽं कुरु ॥

नीराजनेन जगदीश्वरि भक्तसङ्घैः
नीराज्यसे भुवनमङ्गल सिद्धिहेतोः ।
भक्त्या प्रभातसमये सहवाद्यघोषैः
सम्स्तूयसे जहिहि कैतव योगनिद्राम् ॥

निद्रा न ते त्रिजगदीश्वरि विष्णुमाये
सृष्टिस्थितिप्रलय केलिषु सऽंस्थितायाः ।
मन्मोहपाश निगडस्य विमोक्षणाय
सऽंप्रार्थ्यसे जननि मङ्गलसूक्तिभिस्त्वम् ॥

कल्याणशैलनिलये करुणार्णवे श्री
कामेश्वराङ्कनिहिते कलिदोषहन्त्री ।
कालाम्बुधाभकचबन्धबरे मनोज्ञे
श्रीमन्महात्रिपुरसुन्दरि सुप्रभातम् ॥

एणाङ्कखण्डयुतरत्नलसत्किरीटे
शोणाचलेश सहधर्मिणि बाणहस्ते ।
वीणाधरेण मुनिना परिगीयमाने
श्रीमन्महात्रिपुरसुन्दरि सुप्रभातम् ॥

ईशानमुख्यसुरमौळिलसत्पदाब्जे
श्रीमत्सदाशिव महाफलकाढ्यमञ्चे ।

ईशत्स्मितेन विकसत्सुमनोहरास्ये
श्रीमन्महात्रिपुरसुन्दरि सुप्रभातम् ॥

लज्जनतेन नयनेन विलोकमाने
त्रैलोक्यसुन्दरतनुऽं परशम्भुनाथम् ।
मन्दस्मितोल्लसित चारु मुखारविन्दे
श्रीमन्महात्रिपुरसुन्दरि सुप्रभातम् ॥

ह्रीङ्कारजापसुहिते हृदयाम्बुजस्थे
हार्दान्धकारविनिहन्त्रि हरित्पतीढ्ये ।
हर्यक्षवाहिनि हलायुध सेविताङ्घ्रे
श्रीमन्महात्रिपुरसुन्दरि सुप्रभातम् ॥

हस्तेन देवि फणिपाशमथेक्षुचापम्
पुष्पास्त्रमङ्कुशवरऽं सततऽं दधाने ।
हेमाद्रितुङ्गतरशृङ्ग कृताधिवासे
श्रीमन्महात्रिपुरसुन्दरि सुप्रभातम् ॥

सर्वागमोपनिषदीढ्य महाप्रभावे
सामाभिगानविनुते सरसीरुहाक्षि ।
सच्चित्सुखैकरसिके सकलेष्टदात्री
श्रीमन्महात्रिपुरसुन्दरि सुप्रभातम् ॥

कल्याणदात्रि कमनीयगुणार्णवे श्री
कल्माषपादपरिपूजित पादपद्मे ।
कैवल्यदे कलिमलापह चित्स्वरूपे
श्रीमन्महात्रिपुरसुन्दरि सुप्रभातम् ॥

हत्वाऽसुरेन्द्रमतिबाहुबलावलिप्तम्
भण्डऽं प्रचण्डसमरोद्यतमात्तशस्त्रम् ।
सम्रक्षित त्रिजगति त्रिपुराधिवासे
श्रीमन्महात्रिपुरसुन्दरि सुप्रभातम् ॥

लब्धुऽं तव त्रिपुरसुन्दरि सत्कटाक्षम्
कारुण्यपूर्णममरेशमुखादिगीशाः ।
कक्ष्यान्तमेत्य निवसन्ति तव प्रबोधे
श्रीमन्महात्रिपुरसुन्दरि सुप्रभातम् ॥

ह्रीमित्यजस्रमपि ते मनुमादरेण
हृत्पङ्कजेनुकलयन् प्रजपामि नित्यम् ।
हर्षप्रदे हृदयसन्तमसापहन्त्री
श्रीमन्महात्रिपुरसुन्दरि सुप्रभातम् ॥

सत्यात्मिके सकललोकहितप्रदेऽम्ब
सम्पत्करी किटमुखी परिसेविताङ्घ्रे ।
सर्वानवद्यचरिते सुकुमारगात्रि
श्रीमन्महात्रिपुरसुन्दरि सुप्रभातम् ॥

कामोहि तेऽम्ब करुणालवमेव लब्ध्वा
पुष्पायुधोऽपि भवति त्रिजगद्विजेता ।
कामेश्वरेण परिकाङ्क्षित सत्कटाक्षे
श्रीमन्महात्रिपुरसुन्दरि सुप्रभातम् ॥

लज्जापदाङ्कित मनुप्रतिपाद्यरूपे
लीलाविलोकन विसृष्टजगत्सहस्रे ।
लावण्यपूर्णवदने ललिताभिधाने
श्रीमन्महात्रिपुरसुन्दरि सुप्रभातम् ॥

ह्रीङ्कारमन्त्रनिलये हृदिभावनीये
ह्रीङ्कारगर्भमनुजापक सिद्धिदात्रि ।
ह्रीङ्कारमन्त्रमहनीय निजस्वरूपे
श्रीमन्महात्रिपुरसुन्दरि सुप्रभातम् ॥

श्रीशङ्करार्चितपदे शिवभागधेये
श्रीकामराजमहिषि श्रितकामधेनो ।
श्रीशङ्करस्यकुलमङ्गलदेवतेऽम्ब
श्रीमन्महात्रिपुरसुन्दरि सुप्रभातम् ॥

श्री सुप्रभातमहित स्तवमम्बिकायाः
भक्त्या प्रभातसमये भुवि ये पठन्ति ।
श्री मात्रनुग्रहनिरस्तसमस्त खेदाः
सच्चित्सुखात्मक पदꣳ प्रविशन्ति सत्यम् ॥

मुनीन्द्रनारदागस्त्य मान्यायै जय मङ्गलम् ।

प्रणतार्तिनिवारिण्यै पूर्णायै शुभमङ्गलम् ॥

विविधोपनिषद्वेतृ वेद्यायै जय मङ्गलम् ।
शुद्धबुद्धसदानन्द ब्रह्मणे शुभ मङ्गलम् ॥

नतलोकेष्टदायिन्यै नित्यायै नित्य मङ्गलम् ।
सर्वमङ्गलयुक्तायै सत्यायै सर्व मङ्गलम् ॥

सर्वब्रह्माण्डसन्दोह जनन्यै जय मङ्गलम् ।
शङ्करार्चितपादायै शिवाण्यै शुभमङ्गलम् ॥

श्रीचक्रराजनिलयायै श्रीमात्रे जय मङ्गलम् ।
महात्रिपुरसुन्दर्यै शिवायै शुभमङ्गलम् ॥

॥ इति श्री शङ्करानन्दनाथ विरचितऽ
श्री महात्रिपुरसुन्दरी सुप्रभातं समाप्तम् ॥ ॐ ॥

Encoded by R. Harshananda harshanand_16@rediffmail.com

*shrI mahAtripurasundarI suprabhAtam*
pdf was typeset on February 2, 2024

Please send corrections to *sanskrit@cheerful.com*